गौरी स्तुतिः

गौरी स्तुतिः

श्रीः

लीलालब्धस्थापितलुप्ताखिललोकां
लोकातीतैर्योगिभिरंतश्चिरमृग्यां|
बालादित्यश्रेणिसमानद्युतिपुंजां
गौरीममंबामंबुरुहाक्षीमहमीडे ||1||

प्रत्याहारध्यानसमाधिस्थितिभाजां
नित्यं चित्ते निर्वृतिकाष्ठां कलयंतीं|
सत्यज्ञानानंदमयीं तां तनुरूपां
गौरीमंबामंबुरुहाक्षीमहमीडे ||2||

चंद्रापीडानंदितमंदस्मितवक्त्रां
चंद्रापीडालंकृतनीलालकभारां|
इंद्रोपेंद्राद्यर्चितपादांबुजयुग्मां
गौरीमंबामंबुरुहाक्षीमहमीडे ||3||

आदिक्षांतामक्षरमूर्त्या विलसंतीं
भूते भूते भूतकदंबप्रसवित्रीं|
शब्दब्रह्मानंदमयीं तां तटिदाभां
गौरीमंबामंबुरुहाक्षीमहमीडे ||4||

मूलाधारादुत्थितवीथ्या विधिरंध्रं
सौरं चांद्रं व्याप्य विहारज्वलितांगीं|
येयं सूक्ष्मात्सूक्ष्मतनुस्तां सुखरूपां
गौरीमंबामंबुरुहाक्षीमहमीडे ||5||

नित्यः शुद्धो निष्कल एको जगदीशः
साक्षी यस्याः सर्गविधौ संहरणे च|
विश्वत्राणक्रीडनलोलां शिवपत्नीं
गौरीमंबामंबुरुहाक्षीमहमीडे ||6||

यस्याः कुक्षौ लीनमखंडं जगदंडं
भूयो भूयः प्रादुरभूदुत्थितमेव|
पत्या सार्धं तां रजताद्रौ विहरंतीं
गौरीमंबामंबुरुहाक्षीमहमीडे ||7||

यस्यामोतं प्रोतमशेषं मणिमाला-
सूत्रे यद्वत्क्कापि चरं चाप्यचरं च|
तामध्यात्मज्ञानपदव्या गमनीयां
गौरीमंबामंबुरुहाक्षीमहमीडे ||8||

नानाकारैः शक्तिकदंबैर्भुवनानि
व्याप्य स्वैरं क्रीडति येयं स्वयमेका|
कल्याणीं तां कल्पलतामानतिभाजां
गौरीमंबामंबुरुहाक्षीमहमीडे ||9||

आशापाशक्लेशविनाशं विदधानां
पादांभोजध्यानपराणां पुरुषाणां|
ईशामीशार्धांगहरां तामभिरामां
गौरीमंबामंबुरुहाक्षीमहमीडे ||10||

प्रातःकाले भावविशुद्धः प्रणिधाना-
द्भक्त्या नित्यं जल्पति गौरिदशकं यः|
वाचां सिद्धिं संपदमग्र्यां शिवभक्तिं (संपदं उच्चैः)
तस्यावश्यं पर्वतपुत्री विदधाति ||11||

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य
श्रीगोविंदभगवत्पूज्यपादशिष्यस्य
श्रीमच्छंकरभगवतः कृतौ
गौरीदशकं संपूर्णं ||